# shrIve NkaTeshvarAShTottarashatanAmastotram 3

# શ્રીવેઙ્કટેશ્વરાષ્ટોત્તરશતનામસ્તોત્રમ્ ૩

## Document Information

Text title : veNkaTeshvarAShTottarashatanAmastotram

File name : venkatesha3.itx

Category : vishhnu, venkateshwara, vishnu

Location : doc_vishhnu

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Description-comments : Vishnustutimanjari 1

Latest update : May 3, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશ્વરાષ્ટોત્તરશતનામસ્તોત્રમ્ 3

॥ શ્રીઃ ॥

॥ સિદ્ધાઃ ઊચુઃ ॥

ભગવન્ વેઙ્કટેશસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
અનુબ્રૂહિ દયાસિન્ધો ક્ષિપ્રસિદ્ધિપ્રદં નૃણામ્ ॥ ૧॥

॥ નારદ ઉવાચ ॥

સાવધાનેન મનસા શ‍ૃન્વન્તુ તદિદં શુભમ્ ।
જપ્તં વૈખાનસૈઃ પૂર્વં સર્વસૌભાગ્યવર્ધનમ્ ॥ ૨॥

ઓઙ્કારપરમાર્થશ્ચ નરનારાયણાત્મકઃ ।
મોક્ષલક્ષ્મીપ્રાણકાન્તો વેઙ્કટાચલનાયકઃ ॥ ૩॥

કરુણાપૂર્ણહૃદયઃ ટેઙ્કારજપસૌખ્યદઃ ।
શાસ્ત્રપ્રમાણગમ્યશ્ચ યમાદ્યષ્ટાઙ્ગગોચરઃ ॥ ૪॥

ભક્તલોકૈકવરદો વરેણ્યો ભયનાશનઃ ।
યજમાનસ્વરૂપશ્ચ હસ્તન્યસ્તસુદર્શનઃ ॥ ૫॥

રમાવતારમઙ્ગેશો ણાકારજપસુપ્રિયઃ ।
યજ્ઞેશો ગતિદાતા ચ જગતીવલ્લભો વરઃ ॥ ૬॥

રક્ષસ્સન્દોહસંહર્ત્રા વર્ચસ્વી રઘુપુઙ્ગવઃ ।
દાનધર્મપરો યાજી ઘનશ્યામલવિગ્રઃ ॥ ૭॥

હરાદિસર્વદેવેડ્યો રામો યદુકુલાગ્રણીઃ ।
શ્રીનિવાસો મહાત્મા ચ તેજસ્વી તત્ત્વસન્નિધિઃ ॥ ૮॥

ત્વમર્થલક્ષ્યરૂપશ્ચ રૂપવાન્ પાવનો યશઃ ।
સર્વેશો કમલાકાન્તો લક્ષ્મીસલ્લાપસમ્મુખઃ ॥ ૯॥

ચતુર્મુખપ્રતિષ્ઠાતા રાજરાજવરપ્રદઃ ।
ચતુર્વેદશિરોરત્નં રમણો નિત્યવૈભવઃ ॥ ૧૦॥

દાસવર્ગપરિત્રાતા નારદાદિમુનિસ્તુતઃ ।
યાદવાચલવાસી ચ ખિદ્યદ્ભક્તાર્તિભઞ્જનઃ ॥ ૧૧॥

લક્ષ્મીપ્રસાદકો વિષ્ણુઃ દેવેશો રમ્યવિગ્રઃ ।
માધવો લોકનાથશ્ચ લાલિતાખિલસેવકઃ ॥ ૧૨॥

યક્ષગન્ધર્વવરદઃ કુમારો માતૃકાર્ચિતઃ ।
રટદ્પાલકપોષી ચ શેષશૈલકૃતસ્થલઃ ॥ ૧૩॥

ષાડ્ગુણ્યપરિપૂર્ણશ્ચ દ્વૈતદોષનિવારણઃ ।
તિર્યગ્જન્ત્વર્ચિતાઙ્ઘ્રિશ્ચ નેત્રાનન્દોત્સવઃ ॥ ૧૪॥

દ્વાદશોત્તમલીલશ્ચ દરિદ્રજનરક્ષકઃ ।
શત્રુકૃત્યાદિભીતિઘ્નો ભુજઙ્ગશયનપ્રિયઃ ॥ ૧૫॥

જાગ્રદ્રહસ્યાવાસશ્ચ યઃ શિષ્ટપરિપાલકઃ ।
વરેણ્યઃ પૂર્ણબોધશ્ચ જન્મસંસારભેષજમ્ ॥ ૧૬॥

કાર્તિકેયવપુર્ધારી યતિશેખરભાવિતઃ ।
નરકાદિભયધ્વંસી રથોત્સવકલાધરઃ ॥ ૧૭॥

લોકાર્ચામુખ્યમૂર્તિશ્ચ કેશવાદ્યવતારવાન્ ।
શાસ્ત્રશ્રુતાનન્તલીલો યમશિક્ષાનિબર્હણઃ ॥ ૧૮॥

માનસંરક્ષણપરઃ ઇરિણાઙ્કુરધાન્યદઃ ।
નેત્રહીનાક્ષિદાયી ચ મતિહીનમતિપ્રદઃ ॥ ૧૯॥

હિરણ્યદાનગ્રાહી ચ મોહજાલનિકૃન્તનઃ ।
દધિલાજાક્ષતાર્ચ્યશ્ચ યાતુધાનવિનાશનઃ ॥ ૨૦॥

યજુર્વેદશિખાગમ્યો વેઙ્કટો દક્ષિણાસ્થિતઃ ।
સારપુષ્કરણીતીરે રાત્રૌદેવગણાર્ચિતઃ ॥ ૨૧॥

યત્નવત્ફલધાતા શ્રીઞ્જપાદ્ધનવૃદ્ધિકૃત્ ।
ક્લીઙ્કારજાપી કામ્યાર્થપ્રદાનદયાન્તરઃ ॥ ૨૨॥

સ્વસર્વસિદ્ધિસન્ધાતા નમસ્કર્તુરભીષ્ટદઃ ।
મોહિતાખિલલોકશ્ચ નાનારૂપવ્યવસ્થિતઃ ॥ ૨૩॥

રાજીવલોચનો યજ્ઞવરાહો ગણવેઙ્કટઃ ।
તેજોરાશીક્ષણસ્સ્વામી હાર્દાવિદ્યાદિવારણઃ ॥ ૨૪॥

ઇતિ શ્રીવેઙ્કટેશસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
પ્રાતઃપ્રાતસ્સમુત્તાય યઃ પટેદ્ભક્તિમાન્નરઃ ॥ ૨૫॥

સર્વેષ્ટાર્થાનવાપ્નોતિ વેઙ્કતેશપ્રસાદતઃ ॥ ૨૬॥

॥ ઇતિ શ્રીસનત્કુમારસંહિતાન્તર્ગતં
શ્રીવેઙ્કટેશાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by
N. Balasubramanian bbalu at satyamMet.in

*shrIve NkaTeshvarAShTottarashatanAmastotram 3*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*